**बिसवत्** त्रि० बिस+चतुरर्थ्यां मतुप् मस्य वः । मृणाल-युक्तादौ स्त्रियां ङीप् ।

**बिसवर्त्मन्** पु०न० बिसाख्ये नेत्रवर्त्मगतरोगभेदे सुश्रुतः । "शून्यं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् । बिसमन्तर्जल इव बिसवर्त्मेति तन्मतम्" ।

**बिसिनी** स्त्री बिस+पुष्करा० इनि । १पद्मिन्याम् अमरः । २मृणालादियुक्ते देशे ३तत्समुदये च । [पादौ ।

**बिसिल** त्रि० बिस+चतुरर्थ्याम् काश्या० इल । मृणालसमी-

**बीभत्स** त्रि०बध-निन्दायां स्वार्थे सन् कर्मणि घञ् । १पापिनि २जुगुप्सिते, ३घृणाविषये च ४तद्वृत्तौ त्रि० मेदि० । ५नाट्यादौ प्रसिद्धे जुगुप्सास्थायिभावके रसभेदे,पु०अमरः तद्रसविषये ६विकृतमांसादौ त्रि० । "शृङ्गारहास्यकरुण-रौद्रवीरभयानकाः । बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्त-स्तथा मतः" रसानुद्दिश्य सा०द०लक्षितो यथा "जुगुप्सा-स्थायिभावस्तु बीभत्सः कथ्यते रसः । नीलवर्णो महा-कालदैवतोऽयमुदाहृतः । दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् । तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् । निष्ठीव-नास्यवलननेत्रसङ्कोचनादयः । अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः । मोहापस्मारादिरोग । व्याधिश्च मर-णादयः" तल्लक्षणोक्तिः । ७अर्जुने पु० मेदि० ।

**बीभत्सु** पु० बध-निन्दने स्वार्थे सन् उ । १अर्जुने । भा० वि० ४४अ० अस्य निरुक्तिर्न्यायोक्ता यथा "न कुर्य्यां कर्म बीभत्सं युध्यमानः कथञ्चन । तेन देवम-नुष्येषु बीभत्सुरिति विश्रुतः" । बीभत्सुरिति भद्रे कल्याणे सुखे चेत्यस्य सनि रूपम्" नीलक० । तत्र पृषो० इटो-ऽभावो नलोपश्च । अन्ये तु बीभत्सकर्मरहितत्वात् वि-रोधिलक्षणया तन्निन्दनकारित्वाद्वा तथात्वमित्याहुः ।

**बुक** त्रि०बुक्क-अच् पृषो०उपधालोपः । भषणशब्दकारके ततः प्रेक्ष्या० चतुरर्थ्याम् इनि । बुकिन् भषणशब्दकारकस-मीपादौ त्रि० ।

**बुक्क** कुक्कुरादिशब्दे कथने च वा चु०उभ०पक्षे भ्वा० पर०सक० सेट् । बुक्कयति ते बुक्कति अबुबुक्कत् त इरित् अबुक्कत् अबुक्कीत् । "कथने चुरा०कश्वादिशब्दे तु भ्वा०" रमानाथः ।

**बुक्क** न० बुक्क-अच् । १हृदयस्थे मांसपिण्डे २अग्रमांसे ३हृदये च अमरः अस्य स्त्रीत्वमपि स्त्रीत्वे टाप् गौ०ङीष् वा । "बुक्काघातैर्युवतिनिकटे प्रौढ़वाक्येन राधा" उद्भटः । ४छागे पु०(बोका)त्रिका० ।५समये च पु०, ६शोणिते भरत स्त्री टाप् । पृषो० बूक्कबृक्के अपि हृदये ।

**बुक्कन** न० बुक्क-भावे ल्युट् । भषणे कुक्कुरादिशब्दे

**बुक्कन्** पु० बुक्क-कनिन् । बुक्कशब्दार्थे भरतः ।

**बुक्कस** पुंस्त्री०पुक्कस+पृषोदरादि । चण्डाले हेमचन्द्र । [मुकुटः ।

**बुक्काग्रमांस** न०६त० । हृदयस्थे मांसपिण्डाकारे अग्रमांसे राय-

**बुक्कार** पु० बुक्कं भषणमृच्छति ऋ-अण् । सिंहध्वनौ हारा०

**बुट** हिंसायां चुरा०उभ० पक्षे भ्वा०पर०सक०सेट् । बोटयति ते । बोटति । अबूबुटत्-त । अबोटीत् । [बुबोड़

**बड** त्यागे संवरणे च तु०कुटा०सक० सेट् । बुडति अबुडीत्

**बुड़िल** पु०तुदा०बुड-इलच् । अश्वतराश्वापत्ये राजभेदे छा० उ०५।१०।१ । [अबुदत्-अबोदीत् अबोदिष्ट । उदित् क्त्वा वेट् ।

**बुद** निशामने (आलोचने) भ्वा०उ०सक०सेट् । बोदति ते । इरित्

**बुद्ध** पु०बुध क्त । १भगवतोऽवतारभेदे येन वेदतत्कर्मणोर्निन्दा-कृता ।२जागरिते,३ज्ञातवति च त्रि० । ४पण्डिते पु०मेदि० । बुद्धस्य विष्णोः चतुर्विंशत्यवतारमध्ये एकविंशोऽवतारो यथोक्तं "ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्नाऽञ्जनसुतः कीकटेषु भविष्यति" भाग०१स्क० । बुद्धेन प्रोक्तम् अण् तद्वेत्ति अण् । बौद्धप्रोक्तशास्त्रे तद-भिज्ञे च त्रि० । तद्दर्शनभेदतन्मतादिकं सर्वद०सं०दर्शितं यथा "अत्र बौद्धैरभिधीयते यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सु-ज्ञानत्वात् । तदुक्तम् "कार्य्यकारणभावाद्वा स्वभावाद्व वा नियामकात् । अविनाभावनियमो दर्शनान्तरदर्शनादिति" अन्वयव्यतिरेकाववविनाभावनिश्चायकाविति । ननु पक्षे सा-ध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत्, भविष्यति, भूते अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवार-णात् । ननु तथाविधस्थले तावकेऽपि मते व्यभि-चारशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात् । तदेव ह्याशङ्क्येत यस्मि-न्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम् । "व्याघातावधिराशङ्केति" तस्मात् तदुत्पत्तिनिश्चयेन अवि-नाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षो-पलम्भानुपलम्भपञ्चकनिबन्धनः । कार्य्यस्योत्पत्तेः प्रागनु-पलम्भः १कारणोपलम्भे २सत्युपलम्भः३उपलब्धस्य पश्चात् कारणानुपलम्भात्४अनुपलम्भ५ इति पञ्चकारण्या धूमधूम-ध्वजयोः कार्य्यकारणभावो निश्चीयते । तथा तादात्म्यनि-श्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः । अप्रवृत्ते